श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकविंशः सर्गः ॥

## रावणकर्तृकं यमलोकस्योपर्याक्रमणं तेन यमसैनिकानां संहरणं च

एवं सञ्चिन्त्य विप्रेन्द्रो जगाम लघुविक्रमः।
आख्यातुं तद् यथावृत्तं यमस्य सदनं प्रति॥ **7.21.1** ॥

अपश्यत् स यमं तत्र देवमग्निपुरस्कृतम्।
विधानमनुतिष्ठन्तं प्राणिनो यस्य यादृशम्॥ **7.21.2** ॥

स तु दृष्ट्वा यमः प्राप्तं महर्षिं तत्र नारदम्।
अब्रवीत् सुखमासीनमर्घ्यमावेद्य धर्मतः॥ **7.21.3** ॥

कच्चित् क्षेमं नु देवर्षे कच्चिद् धर्मो न नश्यति।
किमागमनकृत्यं ते देवगन्धर्वसेवित॥ **7.21.4** ॥

अब्रवीत् तु तदा वाक्यं नारदो भगवानृषिः।
श्रूयतामभिधास्यामि विधानं च विधीयताम्॥ **7.21.5** ॥

एष नाम्ना दशग्रीवः पितृराज निशाचरः।
उपयाति वशं नेतुं विक्रमैस्त्वां सुदुर्जयम्॥ **7.21.6** ॥

एतेन कारणेनाहं त्वरितो ह्यागतः प्रभो।
दण्डप्रहरणस्याद्य तव किं नु भविष्यति॥ **7.21.7** ॥

एतस्मिन्नन्तरे दूरादंशुमन्तमिवोदितम्।
ददृशुर्दीप्तमायान्तं विमानं तस्य रक्षसः॥ **7.21.8**॥

तं देशं प्रभया तस्य पुष्पकस्य महाबलः।
कृत्वा वितिमिरं सर्वं समीपमभ्यवर्तत॥ **7.21.9**॥

सोऽपश्यत् स महाबाहुर्दशग्रीवस्ततस्ततः।
प्राणिनः सुकृतं चैव भुञ्जानांश्चैव दुष्कृतम्॥ **7.21.10**॥

अपश्यत् सैनिकांश्चास्य यमस्यानुचरैः सह।
यमस्य पुरुषैरुग्रैर्घोररूपैर्भयानकैः॥ **7.21.11**॥

ददर्श वध्यमानांश्च क्लिश्यमानांश्च देहिनः।
क्रोशतश्च महानादं तीव्रनिष्टनतत्परान्॥ **7.21.12**॥

कृमिभिर्भक्ष्यमाणांश्च सारमेयैश्च दारुणैः।
श्रोत्रायासकरा वाचो वदतश्च भयावहाः॥ **7.21.13**॥

सन्तार्यमाणान् वैतरणीं बहुशः शोणितोदकाम्।
बालुकासु च तप्तासु तप्यमानान् मुहुर्मुहुः॥ **7.21.14**॥

असिपत्रवने चैव भिद्यमानानधार्मिकान्।
रौरवे क्षारनद्यां च क्षुरधारासु चैव हि॥ **7.21.15**॥

पानीयं याचमानांश्च तृषितान् क्षुधितानपि।
शवभूतान् कृशान् दीनान् विवर्णान् मुक्तमूर्धजान्॥ **7.21.16**॥

मलपङ्कधरान् दीनान् रूक्षांश्च परिधावतः।
ददर्श रावणो मार्गे शतशोऽथ सहस्रशः॥ **7.21.17**॥

कांश्चिच्च गृहमुख्येषु गीतवादित्रनिःस्वनैः।
प्रमोदमानानद्राक्षीद् रावणः सुकृतैः स्वकैः॥ **7.21.18**॥

गोरसं गोप्रदातारो ह्यन्नं चैवान्नदायिनः।
गृहांश्च गृहदातारः स्वकर्मफलमश्नतः॥ **7.21.19**॥

सुवर्णमणिमुक्ताभिः प्रमदाभिरलङ्कृतान्।
धार्मिकानपरांस्तत्र दीप्यमानान् स्वतेजसा॥ **7.21.20**॥

ददर्श स महाबाहू रावणो राक्षसाधिपः।
ततस्तान् भिद्यमानांश्च कर्मभिर्दुष्कृतैः स्वकैः॥ **7.21.21**॥

रावणो मोचयामास विक्रमेण बलाद् बली।
प्राणिनो मोक्षितास्तेन दशग्रीवेण रक्षसा॥ **7.21.22**॥

सुखमापुर्मुहूर्तं ते ह्यतर्कितमचिन्तितम्।
प्रेतेषु मुच्यमानेषु राक्षसेन महीयसा॥ **7.21.23**॥

प्रेतगोपाः सुसङ्क्रुद्धा राक्षसेन्द्रमभिद्रवन्।
ततो हलहलाशब्दः सर्वदिग्भ्यः समुत्थितः॥ **7.21.24**॥

धर्मराजस्य योधानां शूराणां सम्प्रधावताम्।
ते प्रासैः परिघैः शूलैर्मुसलैः शक्तितोमरैः॥ **7.21.25**॥

पुष्पकं समधर्षन्त शूराः शतसहस्रशः।
तस्यासनानि प्रासादान् वेदिकास्तोरणानि च॥ **7.21.26**॥

पुष्पकस्य बभञ्जुस्ते शीघ्रं मधुकरा इव।
देवनिष्ठानभूतं तद् विमानं पुष्पकं मृधे॥ **7.21.27**॥

भज्यमानं तथैवासीदक्षयं ब्रह्मतेजसा।
असङ्ख्या सुमहत्यासीत् तस्य सेना महात्मनः॥ **7.21.28**॥

शूराणामग्रयातॄणां सहस्राणि शतानि च।
ततो वृक्षैश्च शैलैश्च प्रासादानां शतैस्तथा॥ **7.21.29**॥

ततस्ते सचिवास्तस्य यथाकामं यथाबलम्।
अयुध्यन्त महावीराः स च राजा दशाननः॥ **7.21.30** ॥

ते तु शोणितदिग्धाङ्गाः सर्वशस्त्रसमाहताः।
अमात्या राक्षसेन्द्रस्य चक्रुरायोधनं महत्॥ **7.21.31** ॥

अन्योन्यं ते महाभागा जघ्नुः प्रहरणैर्भृशम्।
यमस्य च महाबाहो रावणस्य च मन्त्रिणः॥ **7.21.32** ॥

अमात्यांस्तांस्तु सन्त्यज्य यमयोधा महाबलाः।
तमेव चाभ्यधावन्त शूलवर्षैर्दशाननम्॥ **7.21.33** ॥

ततः शोणितदिग्धाङ्गः प्रहारैर्जर्जरीकृतः।
फुल्लाशोक इवाभाति पुष्पके राक्षसाधिपः॥ **7.21.34** ॥

स तु शूलगदाप्रासाञ्छक्तितोमरसायकान्।
मुसलानि शिलावृक्षान् मुमोचास्त्रबलाद् बली॥ **7.21.35** ॥

तरूणां च शिलानां च शस्त्राणां चातिदारुणम्।
यमसैन्येषु तद् वर्षं पपात धरणीतले॥ **7.21.36** ॥

तांस्तु सर्वान् विनिर्भिद्य तदस्त्रमपहत्य च।
जघ्नुस्ते राक्षसं घोरमेकं शतसहस्रशः॥ **7.21.37** ॥

परिवार्य च तं सर्वे शैलं मेघोत्करा इव।
भिन्दिपालैश्च शूलैश्च निरुच्छ्वासमपोथयन्॥ **7.21.38** ॥

विमुक्तकवचः क्रुद्धः सिक्तः शोणितविस्रवैः।
ततः स पुष्पकं त्यक्त्वा पृथिव्यामवतिष्ठत॥ **7.21.39** ॥

ततः स कार्मुकी बाणी समरे चाभिवर्धत।
लब्धसंज्ञो मुहूर्तेन क्रुद्धस्तस्थौ यथान्तकः॥ **7.21.40** ॥

ततः पाशुपतं दिव्यमस्त्रं सन्धाय कार्मुके।
तिष्ठ तिष्ठेति तानुक्त्वा तच्चापं व्यपकर्षत॥ **7.21.41** ॥

आकर्णात् स विकृष्याथ चापमिन्द्रारिराहवे।
मुमोच तं शरं क्रुद्धस्त्रिपुरे शङ्करो यथा॥ **7.21.42** ॥

तस्य रूपं शरस्यासीत् सधूमज्वालमण्डलम्।
वनं दहिष्यतो घर्मे दावाग्नेरिव मूर्च्छतः॥ **7.21.43** ॥

ज्वालामाली स तु शरः क्रव्यादानुगतो रणे।
मुक्तो गुल्मान् द्रुमांश्चापि भस्म कृत्वा प्रधावति॥ **7.21.44** ॥

ते तस्य तेजसा दग्धाः सैन्या वैवस्वतस्य तु।
रणे तस्मिन् निपतिता माहेन्द्रा इव केतवः॥ **7.21.45** ॥

ततस्तु सचिवैः सार्धं राक्षसो भीमविक्रमः।
ननाद सुमहानादं कम्पयन्निव मेदिनीम्॥ **7.21.46** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकविंशः सर्गः॥